5. किं नाम प्रत्यक्षम्? प्रत्यक्षस्य भेदद्वयस्य सलक्षणं सोदाहरणं च सर्वम् आलोचयत।

उत्तरम्- प्रमाणसमूहेषु प्रत्यक्षमेव श्रेष्ठं प्रमाणं भवति । पाश्चात्यतर्कविज्ञानी मिल उक्तवान्- 'The truths known by intuition are the original premises from which all others are infereed'. वस्तुतः प्रत्यक्षेण प्रमेयस्य साक्षात्कारो भवति, अतः प्रत्यक्षात् परं तस्य वस्तुनः ज्ञानार्थं प्रमाणान्तरस्य अपेक्षा न भवति । तस्मादेव उक्तम्–**'प्रत्यक्षज्ञानकरणं प्रत्यक्षम्'** अर्थात् प्रत्यक्षज्ञानस्य करणमेव प्रत्यक्षप्रमाणमिति।

**प्रत्यक्षस्य लक्षणम्—** आचार्येण अन्नम्भट्टेन प्रत्यक्षस्य लक्षणमुक्तम् **'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्'** इति । अर्थात् विषयेन्द्रिययोः सन्निकर्षात् यत् ज्ञानमुत्पद्यते तत् ज्ञानं भवति प्रत्यक्षमिति । अत्र इन्द्रियमिति शब्देन चक्षुकर्णनासिकाजिह्वात्वचां ग्रहणं भवति । अर्थशब्देन तु घटादयः पदार्थाः गृह्यन्ते । एवम् इन्द्रियं चक्षुरादिकम्, अर्थो घटादिः, तयोः सन्निकर्षः संयोगादिः, तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः । अनुमित्यादीनामपि ज्ञानत्वात्, अनुमित्यादौ अतिव्याप्तिवारणाय लक्षणे इन्द्रियार्थसन्निकर्षेति पदमुपात्तम्। ननु एवं चेत् इन्द्रियार्थसन्निकर्षजन्यं प्रत्यक्षमित्येव लक्षणं भवतु किमर्थं पुनं ज्ञानमिति पदमिति चेदुच्यते तथा सति सन्निकर्षध्वंसे अतिव्याप्तिः स्यात्। यतो हि सन्निकर्षध्वंसं प्रति इन्द्रियार्थसन्निकर्षस्य कारणत्वात्। अतः तत्र अतिव्याप्तिः मा भूत् इति विचिन्त्य लक्षणे ज्ञानमिति पदमुपात्तम्। सन्निकर्षध्वंसस्य सन्निकर्षजन्यत्वेऽपि ज्ञानत्वाभावात् तत्र नातिव्याप्तिरिति भावः ।

ननु सोपनेत्रचक्षुषा कथं पदार्थग्रहणम् ? चक्षुष उपनेत्रनिरूद्धत्वेन पदार्थेन सह सन्निकर्षाभावात्, कथं वा स्वच्छजाह्नवीसलिलावृतमत्स्यादेश्चक्षुषा ग्रहणमिति चेन्न, स्वच्छद्रव्यस्य तेजोनिरोधक त्वाभावेन तदन्तचक्षुःप्रवेशसम्भावात् । ननु ईश्वरप्रत्यक्षस्य अजन्यत्वात् कथं तत्र लक्षणस्य सङ्गतिरिति चेत् अत्र ईश्वरप्रत्यक्षं लक्ष्यमेव नास्ति । अस्य च लक्षणस्य लक्ष्यं भवति केवलं जन्यप्रत्यक्षमेव । तस्मिन् च जन्यप्रत्यक्षे लक्षणमिदं सुसङ्गतमेव । तेन च नास्ति अत्र कोऽपि दोषः । ईश्वरप्रत्यक्षसाधारणं लक्षणं तु 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्' इति । व्याप्तिज्ञानं, सादृश्यज्ञानं, पदज्ञानं च करणं येषां तानि भवन्ति ज्ञानकरणकानि, यथा अनुमितिः, उपमितिः, शाब्दश्चेति। ज्ञानाकरणकं न

भवतीति ज्ञानाकरणकम्। अर्थात् प्रत्यक्षस्य अन्यम् किमपि ज्ञानं करणं न भवतीत्यतः ज्ञानाकरणकं ज्ञानं भवति प्रत्यक्षमिति । ईश्वरप्रत्यक्षस्य अजन्यत्वात् जन्यप्रत्यक्षे च इन्द्रियाणामेव करणत्वं, न तु ज्ञानस्य इति उभयोः प्रत्यक्षयोः संग्रहः अनेन लक्षणेन भवतीति ।

अस्य प्रत्यक्षज्ञानस्य यत् करणं तदेव प्रत्यक्षप्रमाणम्। किन्तु प्रत्यक्षप्रमाणविषये प्राचीननव्ययोः मतविरोधो दृश्यते। वस्तुतः उभयोः मतयोः मते करणस्वरूपं भिन्नं भिन्नं भवति । तत्र प्राचीनमते करणं भवति फलायोगव्यवच्छिन्नं कारणं करणमिति । अर्थात् कार्योऽव्यवहितपूर्वस्य कारणस्य एव करणत्वमिति । किन्तु नव्यमते करणस्य लक्षणं भवति-व्यापारवदसाधारणं कारणं करणमिति । अर्थात् व्यापारविशिष्टं यत् असाधारणं कारणं तदेव करणमिति । अत्र प्रत्यक्षज्ञानविषये प्रक्रिया तु इयं • 'इन्द्रियम् - इन्द्रियार्थसन्निकर्षः - प्रत्यक्षज्ञानमिति।' अत्र प्राचीनमते प्रत्यक्षज्ञानात् पूर्वं कारणं भवति इन्द्रियार्थसन्निकर्षः । अतः प्रत्यक्षस्य करणं नाम प्रत्यक्षप्रमाणं भवति इद्रियार्थसन्निकर्षः । किन्तु नव्यमते इन्द्रियार्थसन्निकर्षो भवति व्यापारः, तद्व्यापारविशिष्टः असाधारणं कारणं भवति इन्द्रियम् । अतः प्रत्यक्षज्ञानस्य व्यापारविशिष्टासाधारणकारणत्वात् इन्द्रियमेव करणमिति विशेषः ।

**<u>विभागः</u>** – आचार्येण अन्नम्भट्टेन प्रत्यक्षस्य अर्थात् प्रत्यक्षप्रमायाः भेदद्वयमुक्तम्- निर्विकल्पकं सविकल्पकञ्चेति । तदुक्तं **'निर्विकल्पकं सविकल्पकं चेति'** इति । विकल्पशब्दस्य साधारणः अर्थो भवति विशेषणम् । तथा च विकल्पयुक्तं प्रत्यक्षज्ञानं भवति सविकल्पकं, विकल्परहितं प्रत्यक्षज्ञानञ्च निर्विकल्पकमिति ।

**<u>निर्विकल्पकम्</u> -** अन्नम्भट्टाचार्येण निर्विकल्पकप्रत्यक्षस्य लक्षणप्रसङ्गे उक्तम् - **'निष्प्रकारकं ज्ञानं निर्विकल्पकम्'** इति। निष्प्रकारणशब्दस्य व्याख्यायां तेन उक्तम्-

**"विशेषणविशेष्यसम्बन्धानवगाहिज्ञानम्**

**प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकम्"** ।। इति ।

**'विकल्पयति वस्तु यत् तत् विकल्पकम्'** अर्थात् किमपि वस्तु येन विशिष्यते तत् विकल्पकम्, अर्थात् विशेषणम्। अतः विशेषणशून्यं वस्तुस्वरूपमात्रज्ञानमेव निर्विकल्पकमिति सामान्यार्थः।

ज्ञानस्य विषयः त्रिविधो भवति- विशेष्यं, विशेषणं, संसर्गश्च । यथा घटवत् भूतलम् इत्यस्मिन् वाक्ये विशेष्यं भवति भूतलम्, विशेषणं घटवत्, घटवत्भूतलयोः सम्बन्धः संयोग एव संसर्गः । विशेष्यस्य भावः विशेष्यता, एवं विशेषणता, संसर्गता च । अतः वक्तुं शक्यते ज्ञाने **'घटवत् भूतलम्'** इत्याकारके घटे प्रकारताख्यविषयता, भूतले विशेष्यताख्यविषयता, संयोगे संसर्गताख्यविषयता वर्तते। निर्विकल्पके ज्ञाने तत् त्रयमपि नास्ति किन्तु केवलविषयावगाहित्वम्, अतस्तत्त्रयभिन्ना चतुर्थी विषयता तत्राङ्गीक्रियते । उक्तं च न्यायबोधिनिकारैः- **'निर्विकल्पके चतुर्थी विषयता स्वीक्रियते'** इति । अतः त्रिविधविषयतामध्ये कस्यापि तत्राभावात् लक्षणं त्रिधापि भवति - विशेषणानवगाहि ज्ञानं निर्विकल्पकम् अथवा विशेष्यानवगाहि निर्विकल्पकम्, अथवा संसर्गानवगाहि निर्विकल्पकमिति । तस्मादेव अन्नम्भट्टेन उक्तं- **'विशेषणविशेष्यसम्बन्धानवगाहिज्ञानमिति'।** विशेषणावगाहि नाम निरूपकत्वसम्बन्धेन विशेषणता (प्रकारता) ख्यविषयताशून्यज्ञानमित्यर्थः । विशेष्यानवगाहि निरूपकत्वसम्बन्धेन विशेष्यताख्यविषयताशून्यज्ञानमित्यर्थः । एवं संसर्गानवगाहि नाम निरूपकत्वसम्बन्धेन संसर्गाख्यविषयताशून्यज्ञानमित्यर्थः । मूलोत्तलक्षणे निष्प्रकारकोपादानेन सविकल्पकस्य वारणं भवति । अयं घटः इत्यादिज्ञाने घटत्वस्य स्वरूपतो भानात् तादृशघटत्वरूपप्रकारवारणाय ज्ञानमिति पदमुपात्तमिति बोध्यम् ।

<u>**सविकल्पकम्**</u> - विकल्पेन सह वर्तते यत् प्रत्यक्षज्ञानं तदेव सविकल्पकमिति । अन्नम्भट्टाचार्येण सविकल्पकस्य लक्षणमुक्तम्- **'सप्रकारकं ज्ञानं सविकल्पकम् '** इति । दीपिकायां तेन उक्तं **- 'नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानमित्यर्थः '** इति । अर्थात् नाम. जातिः इत्यादिविशिष्टं यत् ज्ञानं तदेव सविकल्पकमिति । अत्र विशेष्यस्य विशेषणस्य संसर्गस्य ज्ञानं भवति । यथा-**'अयं घटः'** इत्युक्ते घटस्य ज्ञानं, घटत्वस्य ज्ञानं, किञ्च घटघटत्वयोः संसर्गस्य च ज्ञानं भवति । तस्मादेव उच्यते नामावगाहि, जात्यावगाहि, विशेषणावगाहि, विशेष्यागाहि यत् ज्ञानं तत् प्रत्यक्षमेव सविकल्पकमिति शम्।

-- By Sanjoy Barman